दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लैकादशी
फाल्गुण 15 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-127 | 1 | फरवरी 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 इज़राइल-संसदि प्रधानमंत्रीं मोदीं 'स्पीकर ऑफ द नेसेट मेडल' इति पुरस्कारेण सम्मानम्

3 'पीएम श्री' विद्यालयेभ्यः भविष्यति 'एचपी फ्यूचर्स' परियोजनायाः परिष्काराणां शुभारम्भः- शिक्षामंत्री

5 महामहोपाध्याय- साधु भद्रेशदास- महोदयस्य संस्कृतजगति योगदानम्

## निर्वाचन आयोगेन दश-राज्येषु राज्यसभायाः सप्तत्रिंशत् स्थानानां कृते द्विवार्षिक-निर्वाचनस्याधिसूचना प्रकाशिता




**हिमसंस्कृतवार्ताः** - निर्वाचन-आयोगेन दशसु राज्येषु स्थितानां सप्तत्रिंशत् राज्यसभा-आसनानां कृते द्विवार्षिक निर्वाचनस्य अधिसूचना प्रख्यापिता। नामाङ्कनपत्राणि मार्चमासस्य पञ्च-दिनांक-पर्यन्तं पूरयितुं शक्यन्ते। मतदानं आगामिमासस्य षोडशे दिनांके भविष्यति। अवधेयमस्ति यत् महाराष्ट्रराज्ये सप्त, तमिलनाडु-राज्ये षट्, बिहार-राज्ये पश्चिम-बङ्ग-राज्ये च पञ्च पञ्च, ओडिशा-राज्ये चत्वारि, तेलङ्गाना-छत्तीसगढ़-हरियाणा-राज्येषु द्वे-द्वे तथा हिमाचलप्रदेशे एकम् असम-राज्ये त्रीणि, आसनानि रिक्तानि सन्ति।

## केन्द्रीयः गृहमन्त्री अमितशाहः बिहारस्य त्रिदिवसीयां यात्रां प्रारब्धवान्



**हिमसंस्कृतवार्ताः** - केन्द्रीयः गृहमन्त्री अमितशाहः बिहारस्य त्रिदिवसीयां यात्रां प्रारब्धवान्। अररियायां जनसभां सम्बोधयन् श्रीशाहवर्यः अवदत् यत् नरेन्द्रमोदी-सर्वकारः भारतीयभूमेः प्रत्येकं उत्कोचग्राहिणम् निष्कासयितुं प्रतिबद्धः अस्ति। गृहमन्त्री इत्यपि अवदत् यत् उत्कोचग्राहिणः मुक्त्याभियानं केवलं मतदातृ-सूच्यां नाम्नां निष्कासनं यावदेव सीमितं न भविष्यति अपितु देशात् अवैधप्रवेशस्य निर्मूलनार्थं विस्तृताभियानरूपेण अपि अस्य प्रवर्तनं भविष्यति।

## विंशतिः - विंशतिः विश्वचषके भारतेन ज़िम्बाबे दलं 72 धावनांकैः पराजितम्




हिमसंस्कृतवार्ताः - कामेश्वर शर्मा। गत दिवसे विंशतिः - विंशतिः क्रिकेटविश्वचषके चेन्नई इत्यस्य MA चिदंबरम् इति क्रीडांगणे भारतेन ज़िम्बाबे देशं 72 धावनांकैः पराजितम्। पणकं विजित्य ज़िम्बाबे देशेन क्षेत्ररक्षणं चयनितम्। भारतस्य प्रारम्भः सुदृढः अभवत्। भारतस्य पक्षतः संजुसैमसनः 24, अभिषेकशर्मा 55, ईशानकिशनः 38, सूर्यकुमारयादवः 33, हार्दिकपांड्या अविजितः 50 तथा तिलकवर्मा अविजितः 44 धावनांकान् अर्जितवन्तः। एतेषां सहयोगेन भारतेन विंशतिः कन्दुकचक्रेषु 4 स्तोभहानौ 254 धावनांकाः अर्जिताः प्रत्युत्तरे ज़िम्बाबे देशस्य प्रारम्भः सुदृढः अभवत्। ज़िम्बाबे पक्षतः मारुमनि 20, बैनट अविजितः 97 तथा सिकन्दरः रजा 31 धावनांकान् अर्जितवन्तः। एतेषां सहयोगेन जिम्बाबे देशः 6 स्तोभानां हानौ 184 धावनांकानेव अर्जितवान्। स्वकीयोत्तम प्रदर्शनाय हार्दिक पांड्या स्पर्धापुरुषः चयनितः।

## प्रधानमन्त्री नरेन्द्रमोदी यरुशलम नगरे स्वकीयेन इजरायली-समकक्षीयेण बेंजामिन नेतन्याहू इत्यनेन सह प्रतिनिधिमण्डल-स्तरीय-वार्ता कृतवान्



**हिमसंस्कृतवार्ताः** - भारत-इजरायल-देशौ सांस्कृतिकम् आदानं प्रदानं, भू-भौतिकान्वेषणं, मत्स्यपालनं जलीयकृषिः, यूपीआई शिक्षायां कृत्रिम बुद्धिमत्तोपयोगः चेत्यादिभिः विषयैः सह विविधेषु क्षेत्रेषु सन्धिपत्राणाम् आदानं प्रदानं च कृतवन्तौ। सन्धिसहयोगज्ञापनेषु हस्ताक्षराणि प्रधानमन्त्रिणः नरेन्द्रमोदिनः तस्य इजरायल-समकक्षीयस्य बेंजामिननेतन्याहू इत्यस्य च मध्ये प्रतिनिधिमण्डलस्तरीयायाः वार्तायाः अनन्तरं जातानि।

### भारत-इजराइल-सम्बन्धाः विश्वासे, लोकतान्त्रिक-मूल्येषु तथा मानवीय-संवेदनशीलतायां आधारिताः सन्ति- प्रधानमन्त्री नरेन्द्रमोदी।

पत्रकारसम्मेलने प्रदत्ते स्वकीये वक्तव्ये, श्रीमोदिना प्रोक्तं यत् भारत-इजरायलदेशयोर्सम्बन्धाः सुदृढविश्वासस्य, परस्पर-लोकतांत्रिकमूल्यानां गभीरमानवीयसंवेदनशीलतायाः च सुदृढाधारस्तम्भेषु प्रतिष्ठापिताः सन्ति। सः अकथयत् एतत् मैत्रीबन्धनं, समयस्य परीक्षणमानदण्डे सिद्धिम् अवाप्नोत्। प्रधानमन्त्रिणा प्रोक्तं यत् अद्य द्वावेव पक्षौ चिर-परीक्षितसहयोगं विशिष्ट-रणनीतिक-सहयोगरूपेण अग्रे नेतुम् ऐतिहासिकं निर्णयं स्वीकृतवन्तौ। सः प्रोक्तवान् यत् नववर्षाणि पूर्वं सः इजरायलदेशस्य यात्रां कुर्वाणः प्रथमः भारतीयप्रधानमन्त्री भवितुं सौभाग्यम् अवाप्नोत्। श्रीमोदी अकथयत् यत् पुनरेकदा इजरायलदेशस्य ऐतिहासिकभूमौ पदार्पणं तस्य कृते गौरवास्पदं भावनात्मकं च क्षणं वर्तते। सः प्रोक्तवान् यत् अद्य द्वावेव पक्षौ क्रिटिकल-एंड-इमर्जिंग-टेक्नोलॉजीज इत्यस्मिन् क्षेत्रे पारस्परिकसहयोगं स्थापयितुं निर्णयं स्वीकृतवन्तौ। सः प्रोक्तवान् यत् इजरायलदेशे यूपीआई इत्यस्य उपयोगाय एका सन्धिः अपि जाता। श्रीनेतन्याहू अकथयत् यत् इजरायल-भारतदेशौ प्राचीन सभ्यतासु अतीते च गौरवम् अनुभवन्ति। परञ्च भविष्यं वशीकर्तुं कृतसङ्कल्पौ स्तः।

## सुभाषितम्

**सतां हि दर्शनं पुण्यं,
तीर्थभूताश्च सज्जनाः।
कालेन फलते तीर्थं,
सद्यः सज्जनसङ्गतिः॥**

सज्जन मनुष्य के दर्शन से ही पुण्य फल की प्राप्ति होती है, क्योंकि सज्जन व्यक्ति साक्षात् तीर्थ स्वरूप होते हैं। तीर्थ में जाने का फल तो समय आने पर प्राप्त होते है, सज्जन की संगति से सद्य (त्वरित ही) फल की प्राप्ति होती है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## नवदेहल्याम् आयोजितस्य "सशक्त नारी विकसित भारत" नाम्नः महिला-नेतृत्वसम्मेलनस्य उद्घाटनम्

**हिमसंस्कृतवार्ताः** - केन्द्रीय-महिला एवं बाल-विकास-मन्त्री अन्नपूर्णा-देवी उक्तवती यत् देशस्य सर्वत्र महिलानां कृते अवसराणां अधिकप्राप्तिः, आर्थिकस्वतन्त्रता च जीवनस्य उत्तमगुणवत्तां सुनिश्चेतुं महिला नेतृत्वयुक्त-विकासः प्रशासनस्य नीतिगत-योजनायाः केन्द्रे अस्ति। नवदेहल्याम् आयोजितस्य "सशक्त नारी विकसित भारत" नाम्नः महिला-नेतृत्वसम्मेलनस्य उद्घाटन-सत्रं सम्बोधयन्ती सा इदमपि प्रोक्तवती। सा प्रधानमन्त्री मुद्रायोजना, स्टार्ट अप इंडिया तथा पी एम स्वनिधि योजना इत्यादीनां अनेकासां योजनानां विषये प्रकाशितवती। एताभिः योजनाभिः महिलाः आर्थिकरूपेण सशक्ताः अभवन् तथा तासां आत्मविश्वासः आत्मनिर्भरता च अपि संवर्धिता।

# राष्ट्रीयस्वयंसेवकसंघस्य सरसंघचालकस्य डॉ. मोहनरावभागवतस्य संबोधनम्




राष्ट्रीयस्वयंसेवकसंघस्य (आर.एस.एस.) प्रमुखः डॉ. मोहनरावभागवतः उक्तवान् यत् संघं ज्ञातुम् अन्तः प्रविश्य निरीक्षणम् आवश्यकम् अस्ति। सः अवदत् यत् संघः राष्ट्रहितार्थं कार्यं करोति, तस्मै न तु सत्ता, न लोकप्रियता, न च अधिकाराः अपेक्षिताः, नापि तस्य प्रसिद्धिप्राप्तेः कापि आकाङ्क्षा अस्ति। द्विवसीय-पञ्जाब-भ्रमणवेलायां डॉ. भागवतः ह्यः पठानकोट्-नगरे 'सेवामुक्त-सेनाधिकारी-गोष्ठीम्' सम्बोधितवान्। सः सर्वेषां श्रेणीनां निवृत्त-सेनाधिकारिभिः सह संवादं कृतवान्।

डॉ. भागवतः प्रतिपादितवान् यत् भारतीयसेना 'विविधतायाम् एकतायाः' श्रेष्ठं उदाहरणम् अस्ति, एषा एव भावना समाजे अपि सुदृढा करणीया। सः उक्तवान् यत् ये व्यक्तयः संस्थाः च राष्ट्रहितकार्ये संलग्नाः सन्ति, तेभ्यः अस्माकं सर्वेषां सहयोगः प्राप्तव्यः। डॉ. भागवतः अवदत् यत् केवलं सीमानां रक्षणं पर्याप्तं नास्ति; सामाजिकं सामञ्जस्यम्, आर्थिकी शक्तिः, सांस्कृतिक-आत्मविश्वासः च अपि तावदेव महत्त्वपूर्णाः सन्ति। सः सामाजिकसद्भाव-नागरिककर्तव्य-पर्यावरणसंरक्षण-पारिवारिकमूल्य-स्वदेशी-राष्ट्रियसुरक्षादि-विषयेषु अपि स्वविचारान् प्रकटितवान्।तत्र 'वन्दे मातरम्' इति गीतस्य इतिहाससम्बद्धा, तस्य गायन-मर्यादा-विषयिणी च एका विशेषप्रदर्शनी आयोजिता आसीत्। तस्यां प्रदर्शिन्यां त्रयाणां सेनादलानां 'परमवीरचक्र' विजेतृणाम् प्रेरणादायकानि चित्राणि अपि प्रदर्शितानि आसन्।

# इज़राइल-संसदि प्रधानमंत्रीं मोदीं 'स्पीकर ऑफ द नेसेट मेडल' इति पुरस्कारेण सम्मानम्



भारत-इज़राइल देशयोः मध्ये रणनीतिक-सम्बन्धानां सुदृढीकरणे असाधारण-योगदानार्थं भारतस्य प्रधानमंत्री नरेन्द्रमोदी इज़राइल-देशस्य संसदि (नेसेट) सर्वोच्चसम्मानेन 'स्पीकर मेडल' इत्यनेन अलङ्कृतः। विश्वे अयं सम्मानः येन केनापि नेतृणा प्राप्तः, तादृशः प्रथमः नेता प्रधानमंत्री मोदी अस्ति। सम्बोधनान्ते इज़राइल-संसदः अध्यक्षः आमिर ओहाना महोदयः प्रधानमन्त्रिणे एतं पुरस्कारं समर्पितवान्।प्रधानमंत्री मोदी उक्तवान् यत् सः पूर्णविनम्रतया कृतज्ञतया च एतं पुरस्कारं स्वीकरोति। एकस्मिन् सामाजिक-माध्यम-सन्देशे (Social Media Post) श्रीमोदिना लिखितं यत् अयं सम्मानः केवलं कस्यचित् एकस्य व्यक्तुः नास्ति, अपितु भारत-इज़राइल देशयोः अक्षुण्ण-मैत्र्याः सम्मानः अस्ति। 'नेसेट-सम्मानः' रक्षा-तन्त्र-कृषि-नवाचार-आर्थिकसहयोगादिषु द्विपक्षीय-सम्बन्धेषु प्रधानमन्त्रिणः विशिष्टां भूमिकां प्रकटयति।केन्द्रीय-गृहमंत्री अमितशाहः अवदत् यत् प्रधानमन्त्रिणः एषः सम्मानः तस्य कुशल-राजनीतिज्ञतां दर्शयति। एषः पुरस्कारः परस्पर-सशक्तिकरणाय मानव-कल्याणाय च उभयोः देशयोः सम्पर्कं प्रोत्सहते। श्रीशाहः अपि उक्तवान् यत् अयं सम्मानः प्रत्येकस्य भारतीयस्य कृते गौरवस्य विषयः अस्ति। एतत् प्रधानमन्त्रिणः तस्याः दूरदृष्टेः निदर्शनम् अस्ति, या लोककल्याणार्थं राष्ट्राणां मध्ये सेतु-निर्माणं करोति।

# कनाडा-देशस्य प्रधानमंत्री मार्ककार्नी-महोदयस्य भारतयात्रा



कनाडा-देशस्य प्रधानमंत्री मार्ककार्नी अद्यारभ्य आरभ्य मार्च-मासस्य द्वितीय-दिनाङ्कं यावत् भारतस्य आधिकारिक-भ्रमणं करिष्यति। प्रधानमंत्री-कार्नी महोदयस्य एषा प्रथमा भारत-यात्रा अस्ति। विदेश-मन्त्रालयेन सूचितं यत् प्रधानमंत्री कार्नी मुम्बई-नगरं प्राप्स्यति। आगामिनि दिनद्वये सः विविधेेषु व्यावसायिक-कार्यक्रमेषु भागं ग्रहीष्यति। तत्र सः भारत-कनाडा देशयोः मुख्याधिकारिभिः (CEOs), उद्योग-वित्तीय-विशेषज्ञैः, नवप्रवर्तकैः, शिक्षाविद्भिः तथा च भारते स्थितानां कनाडाई-पेंशन-निधि-प्रतिनिधिभिः सह संवादं करिष्यति।प्रधानमंत्री कार्नी मार्च-मासस्य प्रथम-दिनाङ्के नवदेहलीं आगमिष्यति। परेद्युः सः प्रधानमंत्री-नरेन्द्रमोदिना सह 'हैदराबाद-हाउस्' इत्यत्र प्रतिनिधिमण्डल-स्तरीयं वार्तां करिष्यति। उभौ नेतारौ भारत-कनाडा-रणनीतिक-सहभागितायाः विविध-क्षेत्रेषु अधुना यावत् अभवत् प्रगतेः समीक्षां करिष्यतः। तौ व्यापार-निवेश-ऊर्जा-महत्त्वपूर्णखनिज-कृषि-शिक्षा-अनुसन्धान-नवाचारादिषु प्रमुख-स्तम्भेषु प्रचलतः सहयोगस्य अपि निरीक्षणं करिष्यतः। उभौ नेतारौ क्षेत्रीय-वैश्विक-घटनाक्रमेषु अपि विचार-विमर्शं करिष्यतः। तत्पश्चात् प्रधानमंत्री मोदी प्रधानमंत्री कार्नी च 'भारत-कनाडा-सीईओ-फोरम' (CEO Forum) इत्यत्र अपि सम्मिलितौ भविष्यतः।एतत् भ्रमणं भारत-कनाडा देशयोः द्विपक्षीय-सम्बन्ध-सुधारस्य दृष्ट्या अतीव महत्त्वपूर्णम् अस्ति। उभौ राष्ट्राध्यक्षौ पूर्वमेव एकाम् रचनात्मक-सन्तुलित-सहभागितां वर्धयितुं सहमतिं प्रकटितवन्तौ, या परस्पर-सम्मानम्, दृढ-लोकसम्बन्धम्, वर्धमान-आर्थिक-पूरकतां च आधारिकृत्य भविष्यति

# प्रधानमन्त्रिणा नरेन्द्रमोदिना इन्स्टाग्राम् इत्यत्र दशकोटि-अनुयायिभिः सह ऐतिहासिकं सोपानम् आरुढम्




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना इन्स्टाग्राम् इत्यत्र दशकोटि-अनुयायिभिः सह ऐतिहासिकं सोपानम् आरुह्य, अस्मिन् सार्वजनिक-सञ्जालीय-प्रकल्पे एतत् कार्यं साधयतः प्रथमः विश्वनेता तथा राजनेतारः अभवत् । अवधेयं यत् प्रधानमन्त्री नरेन्द्रमोदी चतुर्दशोत्तरद्विसहस्रतमाब्दे इन्स्टाग्राम् इत्यत्र सम्मिलितः अभवत् । तस्य इन्स्टाग्राम्-तन्त्रांशे अमेरिकादेशस्य राष्ट्रपतिनः डोणाल्ड्-ट्रम्पः इत्यस्य अपेक्षया द्विगुणादधिकाः अनुयायिनः सन्ति। आगामि-पञ्च-प्रमुखविश्वनेतृणाम् अनुयायिनां सङ्ख्या प्रधानमन्त्री-मोदी-वर्यस्य व्यक्तिगत-अनुयायिनां सङ्ख्यायाः अपेक्षया न्यूना अस्ति।। मोदीवर्यः इन्स्टाग्राम् इत्यत्र अन्येषां भारतीयराजनेतृणाम् अपेक्षया क्रोशान्तरालादग्रे अस्ति । द्वितीये स्थाने उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथः अस्ति, यस्य प्रायः एकषष्टि-लक्षाधिकैककोट्यनुयायिनः सन्ति ।

# सर्वोच्चन्यायालयेन एन.सी.ई.आर.टी. इत्यस्य

## अष्टम-कक्षायाः पुस्तकस्य निषेधः कृतः




**हिमसंस्कृतवार्ताः** - सर्वोच्चन्यायालयेन न्यायपालिकायां भ्रष्टाचारविषये प्रक्षिप्ताध्याय-युक्तस्य एन. सी. ई. आर. टी. इत्यस्य अष्टम-कक्षायाः पुस्तकस्य सम्पूर्णः निषेधः कृतः अस्ति। सर्वोच्च्चन्यायालयः सर्वासां प्रकाशितप्रतीनाम् अभिग्रहणस्य आदेशं प्रायच्छत्, पुस्तकस्य डिजिटल-प्रपत्राणां निष्कासनम् अपि कर्तुम् आदेशम् अयच्छत् । न्यायालयः केन्द्र-राज्य-अधिकारिभ्यः तत्क्षणमेव तस्य निर्देशानाम् अनुपालनं कर्तुम् आदिशत्, यदि निर्देशानाम् केनापिरूपेण अवहेलनं भवति तर्हि गम्भीर-कार्याचरण-विषये च सङ्केतनाम् अयच्छत् । सर्वोच्चन्यायालयेन एन्, सी. ई. आर्. टी. इत्यस्य निर्देशकाय, विद्यालयशिक्षासचिवाय च कारणदर्शिका सङ्केतना प्रदत्ता यस्मिन् तेन पृष्टं यत् उत्तरदायिनां विरुद्धं किमर्थं कार्याचरणं न करणीयम् ।

# 'पीएम श्री' विद्यालयेभ्यः भविष्यति 'एचपी फ्यूचर्स' परियोजनायाः परिष्काराणां शुभारम्भः- शिक्षामंत्री



**हिमसंस्कृतवार्ताः- शिमला।** शिक्षामन्त्री रोहितठाकुरः गुरुवासरे सचिवालयस्य 'समग्र-शिक्षायाः' अन्तर्गतम् आयोजितायाः 'यूनेस्को एचपी फ्यूचर्स' परियोजनायाः सञ्चालनसमित्याः तृतीयगोष्ठ्याः अध्यक्षतां कृतवान्। गोष्ठ्यां परियोजनायाः प्रगतेः समीक्षा तथा च शिक्षापरिष्काराणां अग्रिम-चरणस्य कार्ययोजना निर्धारीता। रोहितठाकुरः अवदत् यत् विस्तृतयोजनानुसारं परिष्काराणां प्रारम्भः १२ 'पीएम श्री' विद्यालयेभ्यः भविष्यति, तदनन्तरं ९९ विद्यालयेषु अस्य विस्तारः भविष्यति, अन्ते च सम्पूर्णे राज्ये एषा योजना प्रवृत्ता भविष्यति।सः 'डाइट' (DIET) माध्यमेन शिक्षक-प्रशिक्षणं सुदृढं कर्तुं, 'हिमाचलप्रदेश-स्कूल-शिक्षा-बोर्ड', 'एससीईआरटी' (SCERT), 'डाइट' च इत्येतेषां मध्ये उत्तम-समन्वयं स्थापितुं नियमित-निरीक्षणं सुनिश्चितं कर्तुं च बलं दत्तवान्। सः अवदत् यत् यूनेस्को-संस्थायाः अनुशंसाः केवलं प्रतिवेदनं यावत् सीमिताः न भवेयुः, अपितु शिक्षणे, अधिगम- परिणामेषु (Learning Outcomes) विद्यालयानां कार्यप्रणाल्यां च दृढ़-परिष्काररूपेण दृश्येरन्। शिक्षामन्त्री उक्तवान् यत् यूनेस्को- सहयोगः राज्यसर्वकारस्य गुणवत्तापूर्ण-विश्वस्तरीय- शिक्षा- प्रदानाय प्रतिबद्धतां दर्शयति। भौगोलिककाठिन्येषु प्राकृतिक-आपत्सु च सत्यपि सर्वकारः दूर-दूर-क्षेत्राणां छात्रेभ्यः नगर-क्षेत्रवत् प्रभावी-शिक्षां प्रापयति। २०२५ तमे वर्षे आरब्धा 'एचपी फ्यूचर्स' परियोजना राष्ट्रिय- शिक्षानीतिः- २०२० तथा राष्ट्रिय-पाठ्यचर्या-रूपरेखा- २०२३ (NCF-2023) इत्यनयोः अनुरूपं वर्तते।

**परियोजनायाः मुख्याः स्तम्भाः उद्देश्यानि च**

परियोजनायाः मुख्योद्देश्यं समावेशी- भविष्यत्- सज्जं, जलवायु-संवेदनशील-विद्यालयानां विकासः चास्ति। एषा परियोजना त्रिषु मुख्यस्तम्भेषु आधारिता अस्ति।

१. कौशलाधारित-शिक्षा (Skill-based education)

२. क्रीडा-माध्यमेन नैतिक-मूल्य-शिक्षा (Value education through sports)

३. हरित-शिक्षा (Green education)

अस्याः उद्देश्यं छात्रेषु सृजनात्मक-चिन्तनं, अनुशासनं, नेतृत्वक्षमतां, दलकार्यं (Teamwork) तथा पर्यावरणं प्रति जागरूकतां विकसितुं वर्तते। शिक्षामन्त्री अवदत् यत् सितम्बर २०२५ तमे वर्षे आयोजितायाः प्रथमगोष्ठ्याः अनन्तरं नागरिक-समाजसङ्घटनैः, 'एससीईआरटी' तथा 'डाइट' इत्येतैः सह व्यापकं विचारविमर्शं कृतम्। प्रायः २०० शिक्षकेभ्यः क्रीडा- माध्यमेन नैतिक-मूल्य-शिक्षायाः प्रशिक्षणं प्रदीयते, येषु वरिष्ठ-माध्यमिक-विद्यालयानां शारीरिक- शिक्षाप्रवक्तारः सम्मिलिताः सन्ति। अनेन सह 'ईको-क्लब' (Eco-clubs) संस्थाः सुदृढाः कृताः, पर्यावरण-गतिविधिषु छात्राणां सहभागिता च वर्धिता अस्ति।

# हिमाचले लोकतन्त्रस्य कण्ठरोधं न सहिष्यामः- राजेशधर्माणी



**हिमसंस्कृतवार्ताः- शिमला।** तकनीकी-शिक्षामन्त्री राजेशधर्माणी अवदत् यत् हिमाचलप्रदेशे लोकतन्त्रस्य कण्ठरोधं न भवितुं दास्यामः। गृहमन्त्रालयस्य प्रेरणयादेहली- आरक्षकाः स्थानीय-आरक्षकाणां अवहेलनां कृत्वा बन्धनं कृतवन्तः। सः अवदत् यत् भारतं लोकतान्त्रिकं देशं वर्तते, सर्वेषां विरोध- प्रकटीकरणस्य अधिकारः अस्ति। 'यूएस- ट्रेड- डील' (US Trade Deal) एकपक्षीयं वर्तते, अनेन भारतस्य हानिः अभवत्। सः उक्तवान् यत् भाजपानेतारः अपि पूर्वं वस्त्र निष्कास्य प्रदर्शनं कृतवन्तः। शान्तिप्रिये हिमाचले केन्द्रसर्वकारः उद्दिश्य वातावरणं दूषयति। हिमाचल-आरक्षकाः नियमानुसारं कार्यं कृतवन्तः।

# अन्तर्राज्यीये बन्धने नियमानां पालनं आवश्यकम्- धनीरामशांडिलः

हिमाचल-देहली-आरक्षकाणां विवादविषये स्वास्थ्यमन्त्री धनीरामशांडिलः अवदत् यत् अन्ताराज्यीय-बन्धनं (Inter-State Arrest) स्वीकृत्य ये नियमाः सन्ति, तेषां पालनं करणीयम् आसीत्। देहली-आरक्षकाः हिमाचल-आरक्षकाणां सहयोगं कुर्युः स्म। नियमाः सुस्पष्टाः सन्ति। यदा 'ट्राञ्जिट-रिमाण्ड' प्राप्तम्, तदा अस्माकं आरक्षकाः विरोधं न कृतवन्तः। अस्मिन् विषये अधिक- बुद्धिमत्तया कार्यं करणीयम् आसीत्।

# हिमाचलप्रदेशे प्रातः षड्वादने आरोपिभिः सह प्रस्थितवती दिल्ली-पुलिस, सम्पूर्णरात्रिं यावत् उच्चनाट्यम् अभवत्





**हिमसंस्कृतवार्ताः- शिमला।** राजधानी शिमलानगरे हिमाचल-पुलिसदलस्य तथा दिल्ली-पुलिसमध्ये बुधवासरे प्रातः आरब्धम् उच्च-स्तरीय-नाट्यम् रात्रेः पर्यन्तम् अनुवर्तितम्। नवदेहल्याम् आयोजिते ए. आई. सम्मेलने प्रदर्शने संलिप्तत्वेन आरोपिताः युवक-काङ्ग्रेसस्य त्रयः कार्यकर्तारः दिल्लीपुलिसदलेन प्रातःकाले चिड़ग्रामात् गृहीताः। ततः परं यदा तान् स्वसहायैः सह दिल्ली-पुलिसद्वारा नेतुम् आरब्धम्, तदा मध्याह्ने शिमला-पुलिसद्वारा दिल्ली-पुलिसस्य विंशतिः अधिकारिणः कर्मचारिणः निरुद्धाः। ते चक्कर-न्यायालयं नीताः सायं प्रायः ७:३० वादने सर्वे मुक्ताः अभवन् येन विवादः समाप्तः।

अथ च, सायं प्रायः ८:०० वादने, यदा दिल्ली-पुलिसस्य दलं तान् युवकान् शोधीनिरोधके उपविष्टम् आसीत्, तदा शिमला- पुलिसदलेन पुनः नाकाबन्धनं कृत्वा तेषां वाहनं निरोधितम्। दिल्ली- पुलिस-अधिकारिणः वाहनात् निर्गत्य शिमला-पुलिसकर्मचारिणः पप्रच्छ- "किं कारणेन वाहनं निरुद्धम्?" ततः उभयोः पक्षयोः वरिष्ठ- अधिकारिणः अपि तत्र आगतवन्तः, तीव्रः वादविवादः अभवत्।

शिमलापुलिसस्य आईपीएस-अधिकारी अभिषेकः दिल्ली-पुलिस-अधिकारिणं प्रति अवदत्- "अद्य भवतः विरुद्धम् एकं प्राथमिकी-प्रकरणं (एफआईआर) अभिलेखितम् अस्ति। किं भवान् अन्वेषणे सहयोगं करोति? भवन्तः त्रयः जनान् अपहृतवन्तः।" तदा दिल्ली-पुलिस-अधिकारी अवदत्- "अहम् अन्वेषणे सहयोगाय सज्जः अस्मि।" अभिषेकः तस्मै प्राथमिकीं प्रति दर्शितवान्। सः अवदत्- "रात्रौ ८:११ वादने प्राथमिकी अभिलेखिता। वयं तु प्रातः ८:०० वादने तान् इतः आनयाम। मम लेखपत्राणि पश्यन्तु। यूयं मां न्यायालये आरोपिणः प्रस्तौतुं निरोद्धुम् इच्छथ। मम समीपे २४ घण्टानां समयः अस्ति। तदा अभिषेकः पप्रच्छ- "भवता स्थानान्तर- रिमाण्डः किमर्थं न प्राप्तः?" दिल्ली-पुलिसस्य अन्यः अधिकारी अवदत् यत् प्राथमिकीसंख्या १९/२६ तेषां समीपे अस्ति, २० तिथौ प्राथमिकी अभिलेखिता, तस्मिन् प्रकरणे नव जनाः पूर्वमेव गृहीताः, तेषां रिमाण्डप्रक्रिया अपि प्राप्ता। अद्य त्रयः गृहीताः, किन्तु शिमलापुलिसदलम् तान् नेतुं न अनुमन्यते। शिमला-पुलिस-अधिकारी अवदत्- "भवतः समीपे वैध-प्रपत्रं नास्ति।" दिल्ली- पुलिस-अधिकारी पप्रच्छ- "किं भवता मम बन्धनस्य- आज्ञापत्रं दृष्टम्?" अभिषेकः अवदत्- "कैमराः निरुद्ध्य अन्वेषणे सहयोगं कुर्वन्तु।" दीर्घ- वाद- विवादानन्तरं दिल्ली-पुलिस-दलं समीपस्थां पुलिस-चौकीं नीतम्।

**प्रतिपक्षस्य प्रतिक्रिया-**

नेताप्रतिपक्षः जयरामठाकुरः अवदत् यत् एतादृशेन प्रकारेण दिल्ली-पुलिसस्य कार्ये हस्तक्षेपः दुःखदः। ए. आई. इम्पैक्ट-समिट कस्यचित् दलस्य न, अपि तु राष्ट्रस्य छवि-निर्माणाय आसीत्।

**काङ्ग्रेस-पक्षस्य मतम्-**

काङ्ग्रेस-अध्यक्षः विनयकुमारः अवदत् यत् युवक-काङ्ग्रेसस्य राष्ट्रीय-अध्यक्षस्य उदयभानुचिबस्य बन्धनं लोकतान्त्रिकमूल्यानां विरुद्धम् आक्रमणम्। एषा क्रिया लज्जास्पदा, अलोकतान्त्रिका, तानाशाहीप्रवृत्तेः उदाहरणम् इति सः उक्तवान्। शान्तिपूर्वकं स्वमतं व्यक्तं कृतवन्तं युवनेतारं केवलं तेन कारणेन गृहीत्वा सर्वकार युवा-शक्तेः तथा प्रश्नोत्तरेभ्यः भयभीता इति दर्शयति इति तेन आरोपितम्।

# हिमाचले कदा होली? कस्मिन् दिने भविष्यति होलिकादहनम्? पण्डितेन उक्ता सम्यक् तिथिः, मुहूर्तः भद्राकालश्च




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे होली-महोत्सवः मुख्यतया ४ मार्च २०२६ (बुधवासरे) धूलण्डी अथवा वर्णोत्सवरूपेण आचर्यते। होलिकादहनम् (लघु-होली अथवा होलिकापूजनम्) कदा करणीयम् इति विषये वार्तालापं कृतम् अमर उजालापत्रस्य प्रतिनिधिभिः सह शिमलानगरस्थस्य राधाकृष्णमन्दिरस्य पण्डितेन उमेशनौटियालेन।

## पण्डित उमेशनौटियालस्य मतम्

शिमलानगरस्थस्य राधाकृष्णमन्दिरस्य पण्डितः उमेश नौटियालः अवदत् यत् 'धर्मसिन्धुः' ग्रन्थानुसारं भद्राकाले कदापि होलिकादहनं न करणीयम्। २ मार्चदिने पूर्णिमातिथौ प्रदोषकालः लभ्यते, किन्तु तस्मिन् काले भद्रा अपि वर्तते। ३ मार्चदिने भद्रा नास्ति, परन्तु सायंकाले प्रदोषकाल-व्यापिनी पूर्णिमा न लभ्यते। तथापि ३ मार्चदिने उदयकालीनपूर्णिमायाः कारणात् सायंकाले होलिकादहनं कर्तुं शक्यते।शास्त्रेषु स्पष्टतया निर्दिष्टम् अस्ति यत् भद्राकाले होलिकादहनं न करणीयम्। यदि द्वितीये दिने पूर्णिमा प्रदोषकालं न स्पृशति, तर्हि प्रथमदिने एव प्रदोषकाले दहनं करणीयम्। विशेष-परिस्थितौ भद्रामुखं त्यक्त्वा भद्रापुच्छे दहनं कर्तुं शक्यते। अतः विचार्यमाणे २ मार्च-सायंकाले अपि होलिकादहनं शक्यते, वर्णोत्सवः तु निःसंकोचं ४ मार्चदिने आचरितुं शक्यते। होलिकादहनाय प्रदोषकाल-व्यापिनीपूर्णिमा अनिवार्या इति 'धर्मसिन्धुः' ग्रन्थे उल्लिखितम् अस्ति।

२ मार्चदिने प्रदोषकालव्यापिनी पूर्णिमा लभ्यते। तस्मिन् दिने सायंकाले पूर्णिमा तथा चन्द्रोदयः अपि भविष्यति, किन्तु तदा भद्रायाः प्रभावः अपि वर्तते। ३ मार्चदिने भद्रा नास्ति, किन्तु प्रदोषव्यापिनी पूर्णिमा नास्ति, अपि च चन्द्रग्रहणम् अपि भवति। अतः शास्त्रसम्मतानुसारं २ मार्च-दिने होलिकादहनं युक्तम्।

होलिकादहनस्य प्रदोषकालः २ मार्चदिने सायं ६:२२ वादनात् रात्रौ ८:५३ वादनपर्यन्तम् अस्ति। भद्रापुच्छकालः ३ मार्चदिने रात्रौ १२:५० वादनात् २:०० वादनपर्यन्तम्, अथवा ३ मार्चदिने प्रातः ५:३२ वादनात् सूर्योदयात् पूर्वं होलिकादहनं शुभम्।

**शिमलानगरे विशेषसिद्धता-**

राजधानी शिमलानगरे होली-महोत्सवस्य कृते विप्पणीषु अपि जनानां सम्मर्दः दृश्यते। विशेषतः लोअर- बाजारप्रदेशे क्रय-विक्रयस्य वेगः वर्धते। बालकानां कृते विविधाः पिच्कार्यः, जल- टङ्किकाः, चित्रित-वर्णसामग्री च विक्रयार्थं सज्जीकृताः सन्ति। अस्मिन् वर्षे ४ मार्चदिने होली-महोत्सवः आचर्यते। लोअर- बाजारसहितम् उपनगर-विप्पणीनाम् आपणेषु वर्णाः आगताः सन्ति। विविधप्रकारस्य वर्णक्षेपण्यः २० रुप्यकात् १३०० रुप्यक-पर्यन्तं, जल-टङ्किकाः २०० रुप्यकात् ८०० रुप्यक-पर्यन्तं विक्रयन्ते।

*बल्ल- आकृतियुक्ताः, पुत्तलिका-चित्रिताः, दाब-यान्तरूपिण्यः, विविध-चित्राङ्किताः पिच्कार्यः बालकान् आकर्षयन्ति। क्रयकाले केचन जनाः स्वपुत्र-पुत्र्यः कृते विशेष-वस्तूनि इच्छन्ति इति अवदन्।*

एकस्य विक्रेतुः वक्तव्यानुसारं होली-महोत्सवाय आवश्यक-वर्ण-सामग्रीणां पर्याप्तभण्डारः उपन्यस्तः अस्ति, जनाः च उत्साहेन क्रयं कुर्वन्ति।

# देहली-आरक्षकाणां निरोध-प्रकरणस्य भवेत् अन्वेषणम्, दोषी-अधिकारिषु अपि भवेत् कार्यविधिः, भाजपापक्षेण उत्थापिता अभ्यर्थना

**हिमसंस्कृतवार्ताः- शिमला।** देहली-आरक्षकाणां कार्यविधौ कथित-हस्तक्षेपस्य प्रकरणं स्वीकृत्य भाजपापक्षेण गुरुवासरे राज्यपाल- शिवप्रतापशुक्लेन सह मिलित्वा ज्ञापनं समर्पितम्। विपक्षनेतुः पूर्वमुख्यमन्त्रिणः जयरामठाकुरस्य नेतृत्वे 'लोकभवनं' प्राप्तवता प्रतिनिधिमण्डलेन सम्पूर्ण-घटनाक्रमस्य केन्द्रसर्वकार- माध्यमेन उच्चस्तरीयान्वेषणस्य, मुख्यमन्त्रिकार्यालयस्य भूमिकायाः स्वतन्त्र- अन्वेषणस्य, दोषी-अधिकारिणां विरुद्धं कार्यविधेः च अभ्यर्थना कृता। राज्यपालेन सह मेलनान्तरं जयरामठाकुरः प्रसारमाध्यमैः सह वार्तालापे अवदत् यत्- "एतत् प्रकरणं केवलं कस्यचित् बन्धनपर्यन्तं सीमितं नास्ति, अपि तु नियमस्य शासनस्य तथा च देशस्य अन्ताराष्ट्रीय-प्रतिष्ठायाः विषयः अस्ति।" सः आरोपं कृतवान् यत् देहली-आरक्षकाणां वैधानिक-कार्यविधौ हस्तक्षेपं कृत्वा सङ्घीय- संरचनायाः हानिः कृता अस्ति। प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे आयोजिते 'एआई-मिट- २०२६' (AI Meet-2026) कार्यक्रमे 'युवकाङ्ग्रेस' सम्बद्धाः केचन जनाः कथितरूपेण अर्धनग्न- प्रदर्शनं कृत्वा देशस्य छविं मलिनां कर्तुं प्रयतितवन्तः। सः उक्तवान् यत् एतत् प्रदर्शनं राहुलगान्धी- प्रियङ्कागान्धिनोः संकेतेन अभवत्, पश्चात् च तेभ्यः जनेभ्यः हिमालचे शरणं दत्तम्। जयरामठाकुरः अवदत् यत् अस्मिन् विषये देहल्यां प्राथमिकी (FIR) पञ्जीकरणानन्तरं देहली- आरक्षकाः विधिसम्मत-कार्यविधिम् आरब्धवन्तः। सः आरोपं कृतवान् यत् केचन आरोपिणः 'हिमाचलसदने' वासिताः, तेषां प्रकोष्ठाणाम् आरक्षणं च मुख्यमन्त्रि-कार्यालयमाध्यमेन कृतम्। एतत् सङ्घटितसंरक्षणस्य सङ्केतः अस्ति। विपक्षनेता सूचितवान् यत् देहली-आरक्षकाणां दलं रोहड्रू-क्षेत्रस्य चांशलवैली प्राप्तवत्, यतः सौरभसिंहः (अमेठी), अरबाजः (कानपुरम्) तथा सिद्धार्थः (मध्यप्रदेशः) बन्दिताः। सः प्रश्नम् उत्थापितवान् यत् हिमाचलप्रदेशेन सह स्थायीसम्बन्धं विना अपि एते जनाः कथम् अत्र प्राप्ताः, किं तेभ्यः राजनैतिक-संरक्षणं दत्तम्?

# पूर्व-तिब्बती- राजनैतिक-बन्दिभिः सह दलाईलामा-महोदयस्य मिलनम्, करुणा- एकता- सन्देशः च दत्तः



**हिमसंस्कृतवार्ताः- धर्मशाला।** तिब्बती-धर्मगुरुः दलाईलामा महोदयः गुरुवासरे मैक्लोडगञ्ज-स्थिते स्वकीये आधिकारिक-निवासे 'अन्ताराष्ट्रीय-तिब्बती- पूर्व- राजनैतिक- बन्दि- सङ्घटनस्य' सदस्यैः सहितान् प्रायः ४५० श्रद्धालून् दर्शनं आशीर्वादं च दत्तवान्। अस्मिन् अवसरे पूर्व-राजनैतिक-बन्दिभिः सह विशेषमिलनकाले दलाईलामा महोदयः तिब्बत-चीन-देशयोः जनानां मध्ये 'सहभागि-मानवीय-मूल्यानाम्' (Shared Human Values) उपरि बलं दत्तवान्। सः अवदत् यत् उभौ अपि समुदायौ करुणा- प्रेम-शान्तीनां समानाम् आकाङ्क्षां धारयतः, मानवीय-दृष्टिकोणेन च सर्वे समानाः सन्ति। मिलनकाले पूर्व-राजनैतिक-बन्दिनः अपि स्वकीयाः भावनाः व्यक्ताः कुर्वन्तः दलाईलामा-महोदयं प्रति गभीरां श्रद्धां प्रकटितवन्तः। ते स्वकीयां हार्दिक-इच्छां प्रकटितवन्तः यत् दलाईलामा महोदयस्य शीघ्रमेव तिब्बते निवसद्भिः तिब्बती-जनैः सह पुनर्मिलनम् (Reunion) भवेत्। एतत् मिलनम् अतीव भावनात्मकं प्रेरणादायकं च आसीत्, यस्मिन् करुणा, सह-अस्तित्वं, तिब्बती-जनानाम् आशानां दृश्यं सुस्पष्टम् आसीत्। पूर्व-बन्दिनः दलाईलामा-महोदयस्य मार्गदर्शनं स्वजीवनस्य प्रेरणा-स्रोतः इति वर्णितवन्तः।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतेन सरलं कथोपकथनम्

मोहनः- नमस्कारः!
माधवः- नमस्कारः! भवतः शुभनाम किम्?
मोहनः- मम नाम मोहनः। भवतः नाम?
माधवः- मम नाम माधवः, अहं विश्वनाथस्य निवासी अस्मि। भवान् किं करोति?
मोहनः- अहं विद्यालये संस्कृतपाठनं करोमि ।
माधवः- बहुसमीचीनम्।
मोहनः- भवान् किं करोति वा श्रीमन्?
माधवः- अहं वैद्यः अस्मि। सामान्ये नैजे औषधापणे जनसेवां करोमि।
मोहनः- अस्तु, सुन्दरम्। महती सेवा इयं भवतः। रोगिणः रोगात् मुक्ताः भवितुमर्हेयुः, अनया सेवया।
माधवः- आम्। भवतः संस्कृतस्य पाठनकार्येण अपि विद्यार्थिनः उत्तमं ज्ञानं लब्धुमर्हेयुः। संस्कृतं महती भाषा, समृद्धा च वर्तते इति श्रूयते। अहमपि संस्कृतं ज्ञातुं शक्नुयां किं मित्र?
मोहनः- आम्, अवश्यम्। संस्कृतज्ञानाय विद्यालये हि पठनीयमिति नात्र कोऽपि नियमः। भवान् औषधापणे स्थित्वा अपि संस्कृताभ्यासं कर्तुं शक्नुयात्। अधुना संस्कृतशिक्षणाय सञ्चारमाध्यमादिकं नानाविधं सौविध्यमस्ति। सरलपुस्तकानि आनीय, स्वकार्यं कुर्वन्नपि पठितुमर्हति। अत्र केवलम् अनुरागस्य, अभिरुचेर्वा विषयो वर्तते। अभ्यासबलात् स्वयमेव संस्कृतं पठितुं, लेखितुं, सम्भाषितुञ्च शक्नुयात्, नात्र शङ्का।
माधवः- अहो, तर्हि अहम् अद्यप्रभृति एव संस्कृताभ्यासाय अवश्यं प्रयतिष्ये। मम मनसि पूर्वत एव संस्कृतप्रीतिः अतुलनीया। आधाराभावात् हि सम्भ्रमितः अहम्। भवादृशो हितैषी मया अद्यैव लब्धः यत् तत् मम महदेतत् सौभाग्यम्।
मोहनः- अस्तु, मित्र! पुनर्मिलाव!
माधवः - धन्यवादाः!

# महामहोपाध्याय- साधु भद्रेशदास- महोदयस्य संस्कृतजगति योगदानम्



हिमसंस्कृतवार्ताः- डॉ नरेन्द्रराणा सिरमौरः, हिमाचलप्रदेशम्। महामहोपाध्याय- साधु भद्रेशदासमहोदयाः आधुनिककालस्य प्रख्याताः संस्कृतविद्वांसः, दार्शनिकाः, बी. ए. पी. एस. (BAPS) स्वामीनारायणसंस्थायाः श्रेष्ठसन्ताश्च सन्ति। तेषां पाण्डित्यं सम्पूर्णविश्वे संस्कृतजगति च सुप्रसिद्धम् अस्ति।

## प्रमुखं कार्यम्- प्रस्थानत्रयी-भाष्यम्

भद्रेशदासस्वामिनां सर्वाधिकं महत्त्वपूर्णं कार्यं 'प्रस्थानत्रयी' इत्यस्य उपरि संस्कृतभाष्यलेखनम् अस्ति। तैः उपनिषद्-भगवद्गीता-ब्रह्मसूत्राणाम् उपरि **'स्वामीनारायणभाष्यम्'** लिखितम्। श्रीशङ्कराचार्याणाम् अनन्तरं भद्रेशदासमहोदयाः एकाकिनः एव विद्वांसः सन्ति, यैः सम्पूर्णप्रस्थानत्रय्याम् नवीनं भाष्यं रचितम्। तैः स्वभाष्यमाध्यमेन **'अक्षर-पुरुषोत्तम-दर्शनम्'** इति वैदिक-सिद्धान्तं प्रतिपादितम्। अनेन कार्येण भारतीयदर्शने एकः नवीनः अध्यायः संयुक्तः। तिरुपतिनगरे अखिल-भारतीय-विद्वत्परिषदा एतत् दर्शनं स्वतन्त्रदर्शनत्वेन स्वीकृतम्। तेषां गुरुः ब्रह्मस्वरूप-प्रमुखस्वामीमहाराजः आसीत्। सम्प्रति ते महन्तस्वामिमहाराजस्य मार्गदर्शने धर्मप्रसारं कुर्वन्ति।

**उपाधयः**-ते 'महामहोपाध्याय', 'वेदान्तमार्तण्ड', 'साहित्य-अकादमी- पुरस्कार' इत्यादिभिः अनेकैः सम्मानैः विभूषिताः सन्ति।

**वैदुष्यम्**- ते व्याकरण- न्याय- वेदान्तादीनां शास्त्राणां प्रकाण्डपण्डिताः सन्ति।

## विशिष्टाः उपलब्धयः-

१. विश्वस्तरीयं सम्मानम् (World-wide Recognition): भद्रेशदास- स्वामिनः तादृशाः विरलाः विद्वांसः सन्ति, ये ऑक्सफोर्ड- विश्वविद्यालयेन (Oxford University) व्याख्यानार्थं निमन्त्रिताः। तेषां संस्कृतपाण्डित्यं दृष्ट्वा हार्वर्ड (Harvard) तथा कोलम्बिया (Columbia) इत्यादि-विश्वविद्यालयानां विद्वांसः अपि विस्मिताः अभवन्।

२. **तुलनात्मक-दर्शन-अध्ययनम्-** तैः न केवलं स्वामीनारायणदर्शनस्य, अपि तु शङ्कराचार्य- (अद्वैत), रामानुजाचार्य- (विशिष्टाद्वैत), मध्वाचार्य- (द्वैत) इत्यादीनां प्रमुखवेदान्तशाखानां गहनं तुलनात्मकमध्ययनं कृतम्। अतः तेषां तर्काः अत्यन्तं प्रभाविनः शास्त्रीयाश्च भवन्ति।

३. **आर्ष-शोध-संस्थानस्य नेतृत्वम्-**
ते देहलीनगरस्थे **'अक्षरधाम'** मन्दिरे स्थितस्य **'आर्ष-शोध- संस्थानस्य'** (AARSH Research Institute) निदेशकाः सन्ति। तत्र ते अनेकेषां शोधच्छात्राणां मार्गदर्शनं कुर्वन्ति।

४. **कठिनः पुरुषार्थः**-प्रस्थानत्रयी-भाष्यस्य रचनाकाले तैः अनेकवर्षाणि यावत् अत्यल्पनिद्रां कृत्वा अहोरात्रं परिश्रमः कृतः। आधुनिकयुगे एकेन व्यक्तिना एतादृशस्य बृहत्तमस्य संस्कृतसाहित्यस्य निर्माणं 'दैवीयकार्यम्' इति मन्यते।

५. **पुरस्काराः उपाधयश्च: साहित्य-अकादमी-पुरस्कारः-**
संस्कृतसाहित्याय तेषां महते योगादानाय एषः पुरस्कारः दत्तः।

**वेदान्त-मार्तण्डः-**
काशीनगरे पण्डितसभायाः पक्षतः एषा महती उपाधिः प्रदत्ता।

**विद्यावाचस्पतिः-** (D.Litt): अनेकैः प्रतिष्ठित-विश्वविद्यालयैः तेभ्यः 'मानद-डॉक्टरेट' (Honorary Doctorate) उपाधिः समर्पिता।

**तेषां जीवनशैली**-एतादृशं विश्वप्रसिद्धं पाण्डित्यं प्राप्यापि भद्रेशदासस्वामिनः अत्यन्तं विनम्राः, सरलाः, निरभिमानिनः च सन्ति। ते स्वस्य सर्वं साफल्यं स्वगुरुणां ब्रह्मस्वरूप-प्रमुखस्वामी- महाराजानां तथा प्रगटगुरु- महन्तस्वामी-महाराजानां कृपाप्रसादं मन्यन्ते। तेषां जीवनं ज्ञानस्य भक्त्याः च अपूर्वः सङ्गमः अस्ति। तेषां सम्पूर्णशिक्षाकाले तैः वाराणसीनगरस्य 'सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयात्' न्यायादिशास्त्रेषु अनेके सुवर्णपदकानि प्राप्तानि। तेषां स्मरणशक्तिः अतीव प्रखरा वर्तते।

**'दर्शन-केशरी' उपाधिः-**
काशी-नगरस्य विद्वत्सभाभिः तेभ्यः 'दर्शन-केशरी' तथा 'अक्षर- पुरुषोत्तम- वेदान्तकेसरी' इति उपाधयः प्रदत्ताः। एतेन ज्ञायते यत् सम्पूर्णभारतस्य विद्वांसः तेषां पाण्डित्यं गौरवपूर्णं मन्यन्ते।

**शोधमार्गदर्शनम् (Research Mentorship):-**
विश्वस्य विविधानां विश्वविद्यालयानां पञ्चशताधिक-शोधच्छात्राणां (500+ Scholars) ते मार्गदर्शकाः सन्ति। तेषां छत्रछायायां संस्कृत-साहित्यस्य महती सेवा भवति।

**गुरुनिष्ठा-**
ते वदन्ति यत्- "एतद् भाष्यं मम पुरुषार्थस्य फलम् नास्ति, अपि तु मम गुरुणां ब्रह्मस्वरूप- प्रमुखस्वामी- महाराजानाम् आशीर्वादस्य पुष्पम् अस्ति।" गुरु- आज्ञापालने तेषां निष्ठा अनुपमा वर्तते।

# साधु-भद्रेशदास-महोदयानां ओड़िशा-केन्द्रीय-विश्वविद्यालयस्य (Central University of Odisha) यात्रायाः विवरणम्

महामहोपाध्याय-साधु-भद्रेशदास-महोदयाः ओड़िशा-राज्यस्य कोरापुट-मण्डले स्थितां 'ओड़िशा-केन्द्रीय-विश्वविद्यालयम्' (Central University of Odisha, Koraput) प्रति गतवन्तः। तत्र विश्वविद्यालयस्य पक्षतः तेषां भव्यं स्वागतं कृतम्।

## शोधच्छात्रान् प्रति सम्बोधनम्

तत्र तैः विश्वविद्यालयस्य 'शोधच्छात्राः' (Research Scholars) विशेषरूपेण सम्बोधिताः। तेषां ओजस्विन्या वाण्या शोधच्छात्राः अतीव प्रेरिताः अभवन्।

**व्याख्यानस्य सारः**-तैः स्वव्याख्याने भारतीय-ज्ञान-परम्परायाः (Indian Knowledge System), संस्कृतस्य महत्त्वस्य तथा आधुनिक-अनुसन्धान-क्षेत्रे प्राचीन-शास्त्राणां उपयोगितायाः विषये गम्भीरं मार्गदर्शनं दत्तम्। तैः छात्रान् प्रति उक्तं यत्— "अनुसन्धानं केवलं पदवी-प्राप्तये न, अपि तु सत्यस्य अन्वेषणाय समाजस्य हिताय च भवेत्।" तेषां सारगर्भितं व्याख्यानं शोधच्छात्राणां कृते ज्ञानवर्धकं प्रेरणादायकं च आसीत्।निष्कर्षः- निष्कर्षरुपेण अहं वक्तुं शक्नोमि तत् साधु- भद्रेशदास- महोदयानां योगदानं संस्कृतभाषायाः दार्शनिकपरम्परायाः च कृते अभूतपूर्वम् अस्ति। तेषां सरलस्वभावः गम्भीरं वैदुष्यं च सर्वेषां कृते प्रेरणादायकं वर्तते।

## "लौकिकन्यायकोशः"
## "भाण्डालेखन्यायः"

भाण्डानाम् उपरि नक्षत्रादिकं क्वचित् चित्रितं भवति। सर्वाणि भाण्डानि तदा एकविधान्येव दृश्यन्ते परस्परं विशेषकं किमपि न भवति। यथा- खण्डनखण्डखाद्यटीकायाम् २८९ पृष्ठे।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता एवम् अस्ति- एकेन अधिकारिणा अन्तिमे क्षणे अवकाशः निरस्तः। ततः केनचित् यूना कर्मकरेण 'मम चिन्ता नास्ति' इति उक्तम्।

**नन्दिनी-** अहो! तेन कर्मकरेण सम्यक् कृतम्। सा वार्ता रोचिका। अधुना अन्या वार्ता- केनचित् तन्त्रज्ञेन कृत्रिममेध-साहाय्येन सङ्केतः लिखितः। किन्तु तस्मिन् सङ्केते महान् दोषः जातः। अतः सः तन्त्रज्ञः कर्मस्थानात् निष्कासितः।

**काव्या-** कष्टकरम्! कृत्रिममेध-साहाय्येन कार्यकरणे सावधानता आवश्यकी। अन्या वार्ता पुष्पप्रदर्शनात् अस्ति- प्रदर्शने जनैः पुष्पाणि सस्यानि च लुण्ठितानि। रक्षकैः अपि जनाः न निवारिताः।

**नन्दिनी-** धिक् तान् जनान्! जनेषु नागरिकतायाः अभावः दृश्यते। अन्तिमा वार्ता विमानपत्तनात् अस्ति- तत्र भोजनस्य मूल्यम् अधिकम् इति एकेन परिवारेण चिन्तितम्। अतः धनरक्षणाय तैः बहिर्भागात् भक्ष्यविशेषः आनायितः।

**काव्या-** आम्! तत्-परिवारेण सम्यक् चिन्तितम्। तैः स्वधनं रक्षितम्। अद्यतनीयः कार्यक्रमः अत्रैव समाप्तः।

## विद्यालयीय-जीवनम्

विद्यालयीय जीवनं ज्ञानराशि अर्जनम्।
विद्यया द्रव्यार्जनं कुर्वन्तु स्वोपार्जनम्॥१॥
राष्ट्रभाव आर्जवं दिव्यभूमि भारतम्।
राष्ट्रधर्म रक्षणं संस्कृतस्य पोषणम्॥२॥
जीवनस्य अर्पणं संस्कृते समर्पणम्।
गद्य-पद्य पाठनं संस्कृतेन भाषणम्॥३॥
गीत-नाट्य नाटकं छन्द सूत्र त्राटकम्।
शिवसूत्र-युक्त वाग्यकं शब्दशास्त्र ग्राह्यकम्॥४॥
वेद-शास्त्र पालकं शब्दशास्त्र जालकम्।
शब्द-सूत्र साधकं नमामि तमाराधकम्॥५॥



डॉ. सन्तोषकुमारकाण्डपालः
सहायकाचार्यः (शिक्षाशास्त्र-विभागः)
महर्षिपाणिनि-संस्कृत- वैदिक-विश्वविद्यालयः, उज्जयिनी, मध्यप्रदेशः